घनाकरः, पुं, (घनानां मेघानामाकरः।) वर्षाकालः। इति शब्दरत्नावली ॥

घनाघनः, पुं, (हन्तीति। हन वधे + पचाद्यच्। ततः “हन्तेर्घत्वञ्च।” ३। १। १३४। इत्यस्य वार्त्ति इति द्वित्वं आक् चाभ्यासस्य।) इन्द्रः। घातुकमत्तहस्ती। वर्षुकमेघः। इत्यमरः। ३।३। १०६ ॥ (यथा, राजतरङ्गिण्याम्। ४। ३६५।
“अम्भोजानि घनाघनव्यवहितोऽप्युल्लाघयत्यंशुमान्
दूरस्थोऽपि पयोधरोऽतिशिशिरस्पर्शं करोत्यातपम् ॥”)
अन्योन्यघट्टनं इति धरणी ॥

घनाघनः, त्रि, निरन्तरः। (हन्तीति। हन् + अच्। “हन्तेर्घत्वञ्च।” इति द्वित्वं आक् चाभ्यासस्य।) घातुकः। इति हेमचन्द्रः ॥ (यथा, ऋग्वेदे। १०। १०३। १।
“आशुः शिशानो वृषभो न भीमो
घनाघनः क्षोभणश्चर्षणीनाम् ॥”)

घनाघना, स्त्री, (घनाघन + टाप्।) काकमाची। इति शब्दचन्द्रिका ॥

घनात्ययः, पुं, (घनानां मेघानामत्ययो नाशो यस्मिन्।) शरत्कालः। इति हेमचन्द्रः। २। ७२ ॥ (यथा, सुश्रुते सूत्रस्थाने ६ अध्याये।
“पैत्तिकानां व्याधीनामुपशमो हेमन्ते श्लैष्मिकानां निदाघे वातिकानां घनात्यये स्वभावत एव ॥”
“हैमन्तिकं दोषचयं वसन्ते
प्रवाहयन् ग्रैष्मिकमभ्रकाले।
घनात्यये वार्षिकमाशु सम्यक्
प्राप्नोति रोगानृतुजान्न जातु ॥”
इति चरके शरीरस्थाने द्वितीयेऽध्याये ॥)

घनामयः, पुं, (घनो दृढः आमयो यस्मात्।) खर्ज्जूरवृक्षः। इति त्रिकाण्डशेषः ॥

घनामलः, पुं, (घनो निविड़ः अमलश्च।) वास्तूकशाकः। इति त्रिकाण्डशेषः ॥

घनाश्रयः, पुं, (घनानां मेघानामाश्रयः।) आकाशम्। इति हेमचन्द्रः। २। ७७ ॥

घनोदधिः, पुं, (घनानां लौहमुद्गराणामुदधिः समुद्र इव। लौहमुद्गरप्रचुरतया एवास्य तथात्वम्।) नरकभेदः। इति हेमचन्द्रः। ५। २ ॥

घनोपलः, पुं, (घनस्य मेघस्य उपलः।) करका ॥ इति हेमचन्द्रः। २। ८० ॥ (करकाशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

घम्ब, गतौ। इति कविकल्पद्रुमः। (भ्वां-परं-सकं-सेट्।) ओष्ठ्यवर्गशेषोपधः। घम्बति। इति दुर्गादासः ॥

घरट्टः, पुं, (घर घर इति शब्देन अटति भ्राम्यतीति। अट + निपातनात् द्वित्वे साधुः) पेषणी। इति पुराणम् ॥ जाता इति भाषा ॥ (यथा, श्रीकण्ठचरिते। ६। ४३।
“स्तम्भमतस्तवत्पतत्पर्यकाय
वतश्रोषहस्तकुसुममापवर भूलतानाम्।
मानस पञ्चलहस्य सहसैव पैष्टुं
तत् समस्तघरट्टविलासमासीत् ॥”)

घर्घटः, पुं, (घर्घ इत्यस्फुटशब्दं अटति गच्छतीति। अट + अच्। शकन्ध्वादित्वात् साधुः।) मत्स्यविशेषः। इति शब्दरत्नावली ॥ टाङ्गरा इति भाषा ॥

घर्घरः, पुं, (घर्घेति अव्यक्तं ध्वनिविशेषं रातीति। रा + “आतोऽनुपसर्गे कः।” ३। २। ३। इति कः।) पर्व्वतद्वारम्। द्वारम्। उलूकः। नदविशेषः। स्वरभेदे त्रि। इति मेदिनी। रे। १५१ ॥ ध्वनिः। (यथा, राजतरङ्गिण्याम्। २। १०३।
“चण्डडमरुनिर्घोषघर्घरं श्रुतवान् ध्वनिम् ॥”)
हास्यम्। इति हेमचन्द्रः। २। २१० ॥ तुषानलः। इति भूरिप्रयोगः ॥

घर्घरकः, पुं, (घर्घर एव। स्वार्थे कन्।) घर्घरनदः। यथा, राजनिर्घण्टे।
“शोणे घर्घरके जलन्तु रुचिरं सन्तापशोषापहं
पथ्यं वह्निकरं तथाच बलदं क्षीणाङ्गवृद्धिप्रदं ॥”

घर्घरा, स्त्री, (घर्घ इत्यव्यक्तशब्दं रातीति। रा + कः स्त्रियां टाप्।) क्षुद्रघण्टिका। वीणाभेदः। इति मेदिनी। रे। १५१ ॥ (गङ्गा। यथा, काशीखण्डे। २९। ५७।
“घुष्टणा पिङ्गरतनुर्घर्घरा घर्घरस्वना ॥”)

घर्घरिका, स्त्री, (घर्घरैव। स्वार्थे कन्। अत इत्वञ्च।) क्षुद्रघण्टिका। भृष्टधान्यम्। नदीविशेषः। वादित्रदण्डः। इति हेमचन्द्रः ॥ वाद्यप्रभेदः। इति विश्वः ॥

घर्घुर्घा, स्त्री, (घुर ध्वनौ + क्विप्। घुर्घुरा ध्वनिविशेषेण गायतीति। गै + डः। निपातनात् गस्य घत्वम्।) यमकीटः। इति रत्नमाला ॥ घुरघुरिया इति भाषा ॥

घर्व्व, गतौ। इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट्।) रेफोपधः। घर्व्वति। इति दुर्गादासः ॥

घर्म्मः, पुं, (घरति क्षरति अङ्गादिति। घृ क्षरणे + “घर्म्मः।” उणां। १। १४८। इति मन्प्रत्ययेन निपातनात् साधुः।) श्रमवारि। अङ्गजलम्। घाम् इति भाषा ॥ (यथा, आर्य्यासप्तशत्याम्। २१२।
“दयितस्पर्शोन्मीलित-
घर्म्मजलस्खलितचरणनखलाक्षे ॥”)
तत्पर्य्यायः। निदाघः २ स्वेदः ३। इत्यमरः। १। ७। ३३ ॥ स्विन्नः ४। इति जटाधरः ॥ स्वेदम् ५। इति शब्दरत्नावली ॥ अस्य निदानं स्वेदशब्दे द्रष्टव्यम् ॥ (घरति क्षरति स्वेदः शरीरादनेन इति। घृ + करणे मन्।) आतपः। ग्रीष्मः। उष्मा। इति हेमचन्द्रः ॥ (यथा, सुश्रुते उत्तरतन्त्रे ६४ अध्याये।
“सरांसि सरितो वापि वनानि रुचिराणि च।
चन्दनानि परार्घ्याणि स्रजः सकमलोत्पलाः ॥
तालवृन्तानिलाहारांस्तथा शीतगृहाणि च।
घर्म्मकाले निषेवेत वासांसि सुलघूनि च ॥”

घर्म्मदोषः, पुं, (घर्म्मस्य स्वेदस्य दोषः विकृतिः।) स्वेदस्य विकारः। तस्यौषधं यथा,—
“मन्दोष्णकोष्णनीवारचर्म्मणा कनकस्य च।
तेनोद्वर्त्तितदेहस्य हरेद्घोषप्रशारिकाम् ॥
त्वग्दोषश्चैव देवेन्द्र! घर्म्मदोषश्च नश्यति ॥”
इति गारुड़े १६४ अध्यायः ॥

घर्म्मविचर्च्चिका, स्त्री, (घर्म्मजनिता स्वेदोत्पन्ना विचर्च्चिका। घर्म्मो ग्रीष्मकालस्तज्जनिता विचर्च्चिका वा।) घर्म्मविचर्च्ची। घर्म्मचर्च्चिका। घामाचि इति भाषा ॥ यथा, प्रयोगामृते।
“स्वेदवाहीनि दुष्यन्ति क्रोधशोकभयैस्तथा।
ततः स्वेदः प्रवर्त्तेत दौर्गन्ध्यं घर्म्मचर्च्चिका ॥
राजिकाकृतिरुष्णोत्था यतो घर्म्मविचर्च्चिका ॥”
अस्याश्चिकित्सा स्वेदशब्दे द्रष्टव्या ॥

घर्म्मान्तः, पुं, (घर्म्मस्य निदाघकालस्य अन्तोऽत्र।) वर्षाकालः। इति राजनिर्घण्टः ॥ (यथा, मेघदूते। १०६।
“घर्म्मान्ते मे विगणय कथं वासराणि व्रजेयुः ॥”
वर्षाकालविवरणेऽस्य विशेषो बोध्यः ॥)

घर्म्मान्तकामुकी, स्त्री, (घर्म्मान्ते वर्षासु कामुकी कामार्त्ता। वर्षाकाले हि अस्याः मैथुनस्पृहा भवतीति प्रसिद्धिः। यद्वा, घर्म्मान्तं वर्षाकालं कामयते इति। कम् + उकञ् स्त्रियां ङीप्।) बलाका। इति राजनिर्घण्टः ॥

घर्षणं, क्ली, (घृष् + भावे ल्युट्।) घर्षः। घषा इति भाषा ॥ यथाह, माधवकरः।
“घर्षणादभिघाताद्वा यदङ्गं विगतत्वचम्।
उषास्रावान्वितं तद्धि घृष्टमित्यभिधीयते ॥”

घर्षणालः, पुं, (घर्षणे घर्षणाय वा अलति पर्य्याप्नोति। अल् + अच्।) शिलापुत्त्रः। इति त्रिकाण्डशेषः ॥ लोड़ा इति भाषा ॥

घर्षणी, स्त्री, (घृष्यते इति। घृष + कर्म्मणि ल्युट्। टित्वात् ङीप् च।) हरिद्रा। इति त्रिकाण्डशेषः ॥ (विवृतिरस्या हरिद्राशब्दे ज्ञातव्या ॥)

घष, इ ङ क्षरे। इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट्।) आद्यस्वरी। इ, घंष्यते। ङ, घंषते। अयं केश्चिन्न मन्यते। इति दुर्गादासः ॥

घस, इ ङ क्षरणे। इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट्।) इ, घंस्यते। ङ, घंसते। अयं केश्चिन्न मन्यते। इति दुर्गादासः ॥

घस, ऌ औ भक्षणे। इति कविकल्पद्रुमः ॥ (भ्वां-परं सकं-अनिट्।) ऌ, अघसत्। औ, घस्ता। इति दुर्गादासः ॥

घसिः, पुं, (घस् भक्षणे + भावे इन्।) आहारः। इति हेमचन्द्रः ॥ (तथाच, वैदिके।
“घसिना मे मासं पृक्था ऊर्द्धं मे नाभेः सीद ॥”)

घस्मरः, त्रि, (घस + “सृघस्यदः क्मरच्।” ३। २। १६०। इति क्मरच्।) अद्मरः। भक्षकः। इत्यमरः। ३। १। २० ॥ (यथा, महाभारते। ८। ४०। ३६।
“गौर्य्यो बृहत्यो निर्ह्रीकाः मद्रिकाः कम्बलावृताः।
घस्मरा नष्टशौचाश्च प्राय इत्यनुशुश्रुम ॥”)

घस्रं, क्ली, (घस् + रक्।) कुङ्कुमम्। इति त्रिकाण्डशेषः ॥